નાસ ય આવિવેશ ભુવનાનિ વિશ્વા ।
પ્રજાપતિઃ પ્રજયા સંવિદાન્-
અસ્ત્રીણિ જ્યોતીꣳષિ સચતે સ ષોડશી ॥ 12.6Ka
વિધર્તારꣳ હવામહે વસોઃ કુવિદ્વનાતિ નઃ ।
સવિતારં નૃચક્ષસમ્ ॥ 12.6Ka
અદ્યાનો દેવ સવિતઃ પ્રજાવત્સાવીઃ સૌભગમ્ ।
પરા દુઃષ્વપ્નિયꣳ સુવ ॥ 39.2
વિશ્વાનિ દેવ સવિતર્દુરિતાનિ પરાસુવ ।
યદ્ભદ્રં તન્મમ આસુવ ॥ 39.3
મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નઃ સન્ત્વોષધીઃ ॥ 39.4
મધુ નક્તમુતોષસિ મધુમત્પાર્થિવꣳ રજઃ ।
મધુદ્યૌરસ્તુ નઃ પિતા ॥ 39.5
મધુમાન્નો વનસ્પતિર્મધુમાꣳ અસ્તુ સૂર્યઃ ।
માધ્વીર્ગાવો ભવન્તુ નઃ ॥ 39.6
ઘૃતં મિમિક્ષિરે ઘૃતમસ્ય યોનિ-
ર્ઘૃતે શ્રિતો ઘૃતમુવસ્ય ધામ ।
અનુષ્વધમાવહ માદયસ્વ
સ્વાહાકૃતં વૃષભ વક્ષિ હવ્યમ્ ॥ 12.7
સમુદ્રાદૂર્મિર્મધુમાꣳ ઉદાર-
દુપાꣳશુના સમમૃતત્વમાનટ્ ।
ઘૃતસ્ય નામ ગુહ્યં યદસ્તિ
જિહ્વા દેવાનામમૃતસ્ય નાભિઃ ॥ 12.8
વયં નામ પ્રબ્રવામા ઘૃતેના-
સ્મિન્યજ્ઞે ધારયામા નમોભિઃ ।
ઉપ બ્રહ્મા શ‍ૃણવચ્છસ્યમાનં
ચતુઃશ‍ૃઙ્ગોઽવમીદ્ગૌર એતત્ ॥ 12.9
ચત્વારિ શ‍ૃઙ્ગા ત્રયો અસ્ય પાદા
દ્વેશીર્ષે સપ્ત હસ્તાસો અસ્ય ।
ત્રિધા બદ્ધો વૃષભો રોરવીતિ
મહો દેવો મર્ત્યાꣳ આવિવેશ ॥ 12.10
ત્રિધા હિતં પણિભિર્ગુહ્યમાનં

